# atha tantroktaM devIsUktam

# અથ તન્ત્રોક્તં દેવીસૂક્તમ્

## Document Information

Text title : tantroktadevIsUktam

File name : tantroktadeviisuukta.itx

Category : sUkta, devii, durgA, svara, devI

Location : doc_devii

Author : Traditional

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com, Chetan Pandya pandyacus at gmail.com

Latest update : June 26, 2004, January 31, 2009

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 8, 2021

*sanskritdocuments.org*

# અથ તન્ત્રોક્તં દેવીસૂક્તમ્

શ્રીગણેશાય નમઃ ।
નમો દેવ્યૈ મહાદેવ્યૈ શિવાયૈ સતતં નમઃ ।
નમઃ પ્રકૃત્યૈ ભદ્રાયૈ નિયતાઃ પ્રણતાઃ સ્મ તામ્ ॥ ૧॥

રૌદ્રાયૈ નમો નિત્યાયૈ ગૌર્યૈ ધાત્ર્યૈ નમો નમઃ ।
જ્યોત્સ્નાયૈ ચેન્દુરૂપિણ્યૈ સુખાયૈ સતતં નમઃ ॥ ૨॥

કલ્યાણ્યૈ પ્રણતાં વૃદ્ધ્યૈ સિદ્ધ્યૈ કુર્મો નમો નમઃ ।
નૈરૃત્યૈ ભૂભૃતાં લક્ષ્મ્યૈ શર્વાણ્યૈ તે નમો નમઃ ॥ ૩॥

દુર્ગાયૈ દુર્ગપારાયૈ સારાયૈ સર્વકારિણ્યૈ ।
ખ્યાત્યૈ તથૈવ કૃષ્ણાયૈ ધૂમ્રાયૈ સતતં નમઃ ॥ ૪॥

અતિસૌમ્યાતિરૌદ્રાયૈ નતાસ્તસ્યૈ નમો નમઃ ।
નમો જગત્પ્રતિષ્ઠાયૈ દેવ્યૈ કૃત્યૈ નમો નમઃ ॥ ૫॥

યા દેવી સર્વભૂતેષુ વિષ્ણુમાયેતિ શબ્દિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૬॥

યા દેવી સર્વભૂતેષુ ચેતનેત્યભિધીયતે ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૭॥

યા દેવી સર્વભૂતેષુ બુદ્ધિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૮॥

યા દેવી સર્વભૂતેષુ નિદ્રારૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૯॥

યા દેવી સર્વભૂતેષુ ક્ષુધારૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૧૦॥

યા દેવી સર્વભૂતેષુ છાયારૂપેણ સંસ્થિતા ।

નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૧૧॥

યા દેવી સર્વભૂતેષુ શક્તિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૧૨॥

યા દેવી સર્વભૂતેષુ તૃષ્ણારૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૧૩॥

યા દેવી સર્વભૂતેષુ ક્ષાન્તિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૧૪॥

યા દેવી સર્વભૂતેષુ જાતિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૧૫॥

યા દેવી સર્વભૂતેષુ લજ્જારૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૧૬॥

યા દેવી સર્વભૂતેષુ શાન્તિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૧૭॥

યા દેવી સર્વભૂતેષુ શ્રદ્ધારૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૧૮॥

યા દેવી સર્વભૂતેષુ કાન્તિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૧૯॥

યા દેવી સર્વભૂતેષુ લક્ષ્મીરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૨૦॥

યા દેવી સર્વભૂતેષુ વૃત્તિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૨૧॥

યા દેવી સર્વભૂતેષુ સ્મૃતિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૨૨॥

યા દેવી સર્વભૂતેષુ દયારૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૨૩॥

યા દેવી સર્વભૂતેષુ તુષ્ટિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૨૪॥

યા દેવી સર્વભૂતેષુ માતૃરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૨૫॥

યા દેવી સર્વભૂતેષુ ભ્રાન્તિરૂપેણ સંસ્થિતા ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૨૬॥

ઇન્દ્રિયાણામધિષ્ઠાત્રી ભૂતાનાં ચાખિલેષુ યા ।
ભૂતેષુ સતતં તસ્યૈ વ્યાપ્ત્યૈ દેવ્યૈ નમો નમઃ ॥ ૨૭॥

ચિતિરૂપેણ યા કૃત્સ્નમેતદ્વ્યાપ્ય સ્થિતાં જગત્ ।
નમસ્તસ્યૈ નમસ્તસ્યૈ નમસ્તસ્યૈ નમો નમઃ ॥ ૨૮॥

સ્તુતા સુરૈઃ પૂર્વમભીષ્ટસંશ્રયાત્તથા સુરેન્દ્રેણ દિનેષુ સેવિતા ॥

કરોતુ સા નઃ શુભહેતુરીશ્વરી શુભાનિ ભદ્રાણ્યભિહન્તુ ચાપદઃ ॥ ૨૯॥

યા સામ્પ્રતં ચોદ્ધતદૈત્યતાપિતૈરસ્માભિરીશા ચ સુરૈર્નમસ્યતે ।
યા ચ સ્મૃતા તત્ક્ષણમેવ હન્તિ નઃ સર્વાપદો
ભક્તિવિનમ્રમૂર્તિભિઃ ॥ ૩૦॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com,
and Chetan Pandya pandyacus and gmail.com

---

*atha tantroktaM devIsUktam*

pdf was typeset on June 8, 2021

Please send corrections to *sanskrit@cheerful.com*